# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् - २** गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड -** C.C-4.1.1 समयः - ३:०० तः ६:००

दिनाङ्कः - ६.१२.२०१६ सन्दर्भग्रन्थः - व्याकरणमहाभाष्यम्

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः- १ निम्नलिखितयोरेकस्य भाष्यानुसारं व्याख्या कार्या- (४)

क. अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्।

ख. सिद्धमेङः सस्थानत्वात्।

प्रश्नः- २ “इग्यणः सम्प्रसारणम्” सूत्रेण वाक्यस्य, वर्णस्य आहोस्विद् उभयस्य संज्ञ भवति इत्यत्र कः सिद्धान्तपक्ष इति गुणदोषविवेचनपुरःसरं प्रतिपादनीयम्। (१२)

**अथवा**

“आद्यन्तौ टकितौ” सूत्रमिदं संज्ञासूत्रं, परिभाषासूत्रम् आहोस्विद् उभयविधमित्यत्र कः सिद्धान्त -पक्ष इति भाष्यदिशा प्रतिपादनीयम्।

प्रश्नः- ३ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं लेख्यम्- (४)

क. 'आद्यन्तौ' अत्र कः समासः?

ख. 'मित्' आगमः कुत्र निविशते?

ग. “मिदचोन्त्यात्परः” सूत्रमिदं षड्विधेषु सूत्रेषु कीदृशं सूत्रमस्ति?

घ. 'मित्' आगमः कस्य अवयवो भवति?

ङ. 'मित्' आगमस्य अनवयवत्वस्वीकारे 'कुण्डानि' इत्यत्र किं भवितुं न अर्हति?

च. ह्रस्वादेशे एचः स्थाने किं भवति?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः- ४ निम्नलिखितयोरेकस्य भाष्यानुसारं व्याख्या कार्या- (४)

क. सामान्यातिदेशे हि विशेषानतिदेशः

ख. यणादेशे युलोपेत्त्वानुनासिकात्त्वप्रतिषेध

प्रश्नः- ५ अनल्विधौ इत्यस्य अर्थं गुणदोषविवेचनपुरस्सरं प्रदर्श्य नित्येषु शब्देषु स्थान्यादेशभावः प्रदर्शनीय (१२)

**अथवा**

“अचः परस्मिन् पूर्वविधौ” सूत्रस्य उदाहरणानि भाष्यदिशा प्रतिपादनीयानि।

प्रश्नः- ६ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं लेख्यम्- (४)

क. “स्थानिवदादेशोऽनल्विधौ” सूत्रेण किं कार्यं भवति?

ख. “अचः परस्मिन् पूर्वविधौ” सूत्रेण किं कार्यं भवति?

ग. अल्विधौ केन सूत्रेण स्थानिवद्भावो भवति?

घ. 'वेतस्वान्' इत्यत्र स्थानिवद्भावेन सकारस्य पदान्तत्वात् तस्य स्थाने किं प्राप्नोति?

ङ. यलोपविधिं प्रति स्थानिवद्भावो न भवति इत्यस्य किम् उदाहरणमस्ति?

च. 'विधिः' इत्यत्र 'धा' धातोः कः प्रत्ययो वर्त्तते?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः- ७ निम्नलिखितयोरेकस्य भाष्यानुसारं व्याख्या कार्या- (४)

क. सिद्धन्त्वन्वयव्यतिरेकाभ्याम्।

ख. सिद्धं तु व्यवसिताऽन्त्यत्वात्॥

प्रश्नः- ८ निम्नलिखितयोरेकस्य सूत्रस्य भाष्यदिशा व्याख्या कार्या- (८)

क. उपदेशेऽजनुनासिक इत

ख. न विभक्तौ तुस्माः

प्रश्नः- ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरंलेख्यम्- (३)

क. "भूवादयो धातवः" सूत्रेण का संज्ञा क्रियते?

ख. "चुटू" सूत्रे 'चु' इत्यनेन कस्य ग्रहणं भवति?

ग. "तस्य लोपः" सूत्रेण कस्य लोपो भवति?

घ. षड्विधेषु सूत्रेषु"यथासंख्यमनुदेशः समानाम्" कीदृशं सूत्रमस्ति?

ङ. अधिकारः कस्य क्रियते?

चतुर्थान्वितिः (युनिट - ४)

प्रश्नः- १० निम्नलिखितयोरेकस्य सूत्रस्य भाष्यदिशा व्याख्या कार्या- (४)

क. न गतिहिंसार्थेभ्यः

ख. विपराभ्यां जेः

प्रश्नः- ११ निम्नलिखितयोरेकस्य सूत्रस्य भाष्यदिशा व्याख्या कार्या- (८)

क. कर्तरि कर्मव्यतिहारे

ख. क्रीडोऽनुसम्परिभ्यश्च

प्रश्नः- १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरंलेख्यम्- (३)

क. ङितो धातोः कस्य पदस्य विधानं भवति?

ख. 'ङित्' इत्यत्र कः समासः?

ग. "इतरेतरान्योन्योपपदाच्च" सूत्रेण किं कार्यं क्रियते?

घ. "समवप्रविभ्यः स्थः" सूत्रेण कस्य पदस्य विधानं भवति?

ङ. 'आतिष्ठते' इत्यत्र कस्मिन् अर्थे आत्मनेपदस्य विधानं भवति?

***